योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०७६

षट्सप्ततितमः सर्गः ७६

श्रीवसिष्ठ उवाच ।

अथैकदा पुरे श्रेष्ठे कस्मिंश्चिन्मण्डलान्तरे ।

अनपत्ये नृपं मृत्युरहन्मत्स्य इवामिषम् ।। १

तत्र प्रकृतयः खिन्ना नष्टदेशक्रमा नृपम् ।

अन्विष्यन्ति स्म संयुक्तं गुणलक्ष्म्या विशालया ।। २

तं भगीरथमासाद्य स्थिरं भिक्षाचरं मुनिम् ।

परिज्ञाय समानीय सैन्ये चक्रुर्महीपतिम् ।। ३

भगीरथः क्षणेनैव प्रावृषीवाम्बुना सरः ।

वलितः सेनया गुर्व्या झटित्याशिश्रिये गजम् ।। ४

भगीरथो जगन्नाथो जयतीति जनारवैः ।

नीरन्ध्रतामुपाजग्मुर्गिरीन्द्राणां महागुहा ।। ५

तत्र तं पालयन्तं तद्राज्यं राजानमादृताः ।

आजग्मुः प्राक्प्रकृतयः प्राहुरित्थं नृपाधिपम् ।। ६

प्रकृतय ऊचुः ।

राजन्नस्माकमधिपो यस्त्वया स पुरस्कृतः ।

मृत्युना विनिगीर्णोऽसौ मत्स्येनेवामिषं मृदु ।। ७

तत्तत्पालयितुं राज्यं प्रसादं कर्तुमर्हसि ।

अप्रार्थितोपयातानां त्यागोऽर्थानां च नोचितः ।। ८

श्रीवसिष्ठ उवाच ।

इति संप्रार्थितो राजा तदङ्गीकृत्य तद्वचः ।

सप्तसागरचिह्नायाः स बभूव भुवः पतिः ।। ९

समः शान्तमना मौनी वीतरागो विमत्सरः ।

प्राप्तकार्यैककरणः स तिरोहितविस्मय ।। 6.1.76.१०

पातालतलनष्टानां सागराकारकारिणाम् ।

पितामहानां गङ्गाम्बु शुश्रुवे तारणक्षमम् ।। ११

तदा किल स्वर्गनदी वहति स्म न भूतले ।

पितॄणां भूतविख्योऽभूत्तेन गङ्गाजलाञ्जलिः ।। १२

भगीरथेन च महीमवतारयितुं दिवः ।

गङ्गां गृहीतो नियमस्ततःप्रभृति भूभृता ।। १३

ततो राज्यं परित्यज्य मन्त्रिणां भूपतिः शमी ।

तपसे कार्यकार्येहो जगाम विजनं वनम् ।। १४

तत्र वर्षसहस्रैश्च समाराध्य पुनःपुनः ।

ब्रह्माणं शंकरं जह्नुं भुवि गङ्गामयोजयत् ।। १५

ततः प्रभृत्यमलतरङ्गभङ्गिनी

जगत्पतेः शशिविभृदङ्गसङ्गिनी ।

नभस्तलान्निपतति गां त्रिमार्गगा

महात्मनामिव बहुपुण्यसंततिः ।। १६

स्फुरत्तरङ्गभङ्गिनी स्वफेनपुञ्जहासिनी

प्रसन्नपुण्यमञ्जरीयुतेव धर्मसंततिः ।

भगीरथे महीपतौ यशःप्रचारवीथिका

तदा हि सा त्रिमार्गगा महीतले बभूव ह १७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० गङ्गावतरणं नाम षट्सप्ततितमः सर्गः ।। ७६ ।।